# शान्ति पाठः

ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः।।१।।

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः।।२।।

ॐ यश्छन्दसामृषभो विश्वरूपः छन्दोभ्योऽध्यमृतात् सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय। ॐ शान्तिः शान्तिः शान्तिः।।३।।

ॐ अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविण ँसवर्चसम्। सुमेधा अमृतोऽक्षितः। इति त्रिशंकोर्वेदानुवचनं। ॐ शान्तिः शान्तिः शान्तिः।।४।।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते। ॐ शान्तिः शान्तिः शान्तिः।।५।।

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुःश्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि। सर्वं ब्रह्मौपनिषदं। माऽहं ब्रह्म निराकुर्यां। मा मा ब्रह्म निराकरोद्। अनिराकणमस्त्वनिराकरणं मेऽस्तु। तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु। ते मयि सन्तु। ॐ शान्तिः शान्तिः शान्तिः।।६।।

ॐ वाङ् मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितमावीर्आवीर्म एधि। वेदस्य म आणिस्थः। श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारं। अवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः।।७।।

ॐ भद्रं नोऽपिवातय मनः। ॐ शान्तिः शान्तिः शान्तिः।।८।।

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस तनूभिर्व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिनस्ताक्ष्योऽरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्ददातु। ॐ शान्तिः शान्तिः शान्तिः।।९।।

ॐ यो वै ब्रह्माणं विदधाति पूर्वं। यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्म बुद्धिप्रकाशं। मुमुक्षुर्वै शरणमहं प्रपद्ये। ॐ शान्तिः शान्तिः शान्तिः।।१०।।

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशर्षिभ्यो महद्भ्यो नमो गुरुभ्यः। सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ब्रह्मैवाहमस्मि।।

ॐ नारायणं पद्मभवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च। व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यं।। श्रीशंकराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यं। तं त्रोटकं वार्तिककारमन्यानस्मद् गुरून्संततमानतोऽस्मि।। श्रुतिस्मृतिपुराणानामालयं करुणालयं। नमामि भगवत्पादं शंकरं लोकशंकरं।।

शंकरं शंकराचार्यं केशवं बादरायणं। सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः।। ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने। व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः।।

ॐ शान्तिः शान्तिः शान्तिः।।११।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM